# PART III

## Sanskrit Texts

## THE ALAMBANA–PARIKSA

Karika and Vrtti

of

ACHARYA DINNAGA

# आलम्बनपरीक्षा
## कारिका

१ यद्यपीन्द्रियविज्ञप्तेः[1] कारणं परमाणवः ।
अतदाभतया नास्या अक्षवद्विषयोऽणवः ॥

२ यदाभासा[2] न सा तस्मात् द्रव्याभावा[3]द्विचन्द्रवत् ।
एवं बाह्यद्वयमपि न युक्तं बुद्धिगोचर ॥

३ साधनं सञ्चिताकार इतीच्छन्ति केचन[4] ।
अण्वाकारो न विज्ञप्तेरर्थः[5] कठिनतादिवत् ॥

४ भवेद्घटशरावादेस्तथा सति समा मतिः ।
आकारभेदाद्भेदश्चेत् स नास्ति द्रव्यसत्यणौ ॥

५ तत्परिमाणभिन्नत्वात् द्रव्या[6]सति ततोस्ति सः ।
अणूनां परिहारे हि तदाभज्ञानविप्लवात्[7] ॥

६ यदन्तर्ज्ञेयरूपन्तु बहिर्वदिव भासते ।
सोऽर्थो विज्ञानरूपत्वात्तत्प्रत्ययतयापि[8] च ॥

७ प्रत्ययो[9]ऽव्यभिचा[10]रित्वात् दृशक्त्यर्पणात्क्रतमा[11] ।
सहकारिवशाद्यद्धि शक्तिरूपं (तत्) इन्द्रियम् ॥

८ सा चाविरुद्धा विज्ञप्तावेवं विषयरूपकम्[12] ।
प्रवर्ततेऽनादिकालात् शक्तिश्चान्योन्यहेतुके ॥

इत्याचार्यदिङ्नागकृता आलम्बनपरीक्षाप्रकरण-
कारिका समाप्ता ।

## Foot notes
## to the Text

Tangyur (Narthang) Mdo. ce (xcv)Nos. 4-5.

1. This verse is cited in the Pramāṇavārtika-Alankāra by Prajñākara Gupta, Chap. II. ad ver.294.

The Tattva - sangraha-panjika [G O S]. P.582 the verse with different reading: यद्यपीन्द्रियविज्ञप्तेर्ग्राह्ययांश: कारणं भवेत् ॥

अतदाभतया तस्यानाक्षवद्विशय: स तु ।

the pañjikā attributes the verse to one Bhadanta ( तेनैव भदन्तेन दुषणमुक्तम् ). May this Bhadanta be the same as Subhagupta ? The verse is not, however, traced in the Bahyartha Siddhi.

2. Or अद्रव्यत्वात् or द्रव्यासत्त्वात्.

3. This quarter is identical with one in the Pramāṇa Samuccaya cited in Pr. Vartikālankara, II, 302.

4. This line being put literally may read thus : केचित् सञ्चिताकारान् साधनमिच्छन्ति ।

5. Lit. विज्ञप्ति-अर्थ :

6. The two quarters 4d-5a form one idea and they may be literally put thus : स: अणौ द्रव्यसति नास्ति परिमाणभेदाभावात।

7. This may literally read thus : परमाणुपरिहारे तदाभज्ञानविप्लव: । The reading 'विप्लवात्' is adopted from the Tibetan version of the Vṛtti .

8. This verse is quoted in the Tattvas. panjikā, p. 582. Sankaracharya cites the first half in his Sutra bhasya, ad II, 2, 28 with the reading of तत् for तु.

9. This line is cited by Parthasarathi Misra in his comment on Sloka-vartika, pp. 311-12. See discussion on this point p. 20 above.

10. Tib. mi-(ma)-hkhrul. phyir. na.

11. This quarter is cited in the Tattvas. Pañ. p. 582 along with the prose passage of the Vṛtti thus: अथवा शक्त्यर्पणात् क्रमेणापि, etc.

12. Or विषयरूपता शक्तिश्च अन्योन्यहेतुका अनादिकालात् प्रवर्तते ॥

# आलम्बनपरीक्षावृत्तिः

येचक्षुरादिविज्ञानानां बाह्यार्थं आलम्बनमितीच्छन्ति। ते तत्कारणत्वात् परमाणून्[1] वा तदाभासज्ञानजनकत्वात् तत्सङ्घातं[2] वा कल्पयन्ति। तत्र तावत्-

यद्यपीन्द्रिय विज्ञप्तेः कारणं परमाणवः।
अतदाभतया नास्या अक्षवद्विषयोऽणवः ॥ १ ॥

विषयो[3] हि नाम यस्य ज्ञानेन स्वभावोऽवधार्यते। तदाकारोत्पत्तेः। परमाणवस्तत्कारणत्वे[4] सत्यपि न तथा इन्द्रियवत्। एवं तावत्परमाणवो नालम्बनम् ॥ १ ॥

सङ्घातस्तदाभासत्वे[5] सत्यपि [ नालम्बनम् ] ।

यदाभासा[6] न सा तस्मात्

योऽर्थः स्वाभासां विज्ञप्तिं जनयति। स ह्यालम्बनं युज्यते। यतः सा एवोत्पत्तिप्रत्ययतयोच्यते[7]। सङ्घातस्तु न तथा।

द्रव्याभावात्[8] द्विचन्द्रवत्।

इन्द्रियवैकल्यात् द्विचन्द्रदर्शनस्य तदाभासत्वे सत्यपि तस्य विषयो नास्ति। एवमद्रव्यसत्वात् सङ्घातो नालम्बनम्।

एवं[9] बाह्यद्वयमपि न युक्तं मतिगोचरः ॥ २ ॥

एकाङ्गवैकल्यात् बाह्यः परमाणु सङ्घातश्चेत्युक्तोऽर्थो[10] नालम्बनम् ॥ २ ।

अत्र साधनं सञ्चिताकार इतीच्छन्ति[11] केचन।

सर्वेऽप्यर्था अनेकाकारा इति तत्र केनचिदाकारेण प्रत्यक्षमिष्यन्ते। परमाणुष्वपि[12] सञ्चिताभासज्ञानोत्पत्तिहेतुभावोऽस्ति।

अण्वाकारो न विज्ञप्तेरर्थः कठिनतादिवत् ॥ ३ ॥

यथा कठिनतादि विद्यमानमपि न चक्षुर्बुद्धेर्विषयः। एवमणुत्वमपि समानम् ॥ ३ ॥

भवेद्घटशरावादेस्तथा सति समा मतिः।

घटशरावादीनां परमाणुषु बहुष्वपि न कोऽपि विशेषोऽस्ति।

आकारभेदाद्भेदश्चेत्

यदि मन्यसे ग्रीवाद्याकारविशेषः कर्म[13] येन बुद्धेर्विशेष उपाधि भवेत् इति । अयमुपाधिर्घटादावस्ति ।

नास्ति तु द्रव्यसत्यणौ ॥ ४ ॥

तत्परिमाणभिन्नत्वात्

परमाणुषु द्रव्यान्तरेष्वपि न पारिमण्डल्ये[14] विशेषोऽस्ति ।

द्रव्यासति[15] ततोऽस्ति सः ।

आकारभेदः संवृतिसत्स्वेवास्ति न तु परमाणुषु । घटादयः संवृतिसन्त एव ।

अणूनां परिहारे हि तदाभज्ञानविप्लवात्[16] ॥ ५ ॥

द्रव्यसत्सु सम्बन्धिनामपनये[17] वर्णादिवत्[18] स्वबुद्धि र्न त्यज्यते । तथा सति इन्द्रिय-बुद्धीनां विषयो बहि र्नास्तीत्युपपन्नम् ॥ ५ ॥

यदन्तर्ज्ञेयरूपन्तु बहिर्वदवभासते ।

सोऽर्थः

बाह्येऽर्थेऽसति बहिर्वदवभासनमन्तस्सदेवालम्बनप्रत्ययः ।

विज्ञानरूपत्वात् तत्प्रत्ययतयाऽपि च ॥ ६ ॥

अन्तर्विज्ञानमर्थंतयावभासते[19] तत[20] उत्पद्यते चेति धर्मताद्वयविशिष्टमित्यतः अन्तस्सदेवालम्बनप्रत्ययः ।

यदि[21] तावदेवमवभास एव वेद्यते । कथं तदेकदेशः सहोत्पन्नः प्रत्ययः ॥ ६ ॥

प्रत्ययोऽव्यभिचारित्वात्[22] सह

सहभूतोऽपि अव्यभिचारात् अन्यजातस्य[23] प्रत्ययो भवति । हैतुका[24] एवमाहुः– भावाभावयोस्तद्वत्ता हि (कार्यंकारणयो) र्हेतुहेतुमतोः क्रमेण जायमानयोश्च लक्षणम् इति । अथ[25] वा

शक्त्यर्पणात् क्रमेण [वा] ।

क्रमेणापि सोऽर्थाविभासः स्वानुरूपकार्योत्पत्तये[26] शक्तिं विज्ञानाधारां करोतीत्यविरोधः ॥

यदि तर्हि अन्तः रूपमेवालम्बनप्रत्ययः[27] । कथं त [द्रूपं] प्रतीत्य चक्षुश्च चक्षुर्विज्ञानमुत्पद्यत इति ।

सहकारिवशाद्यद्धि शक्तिरूपं तदिन्द्रियम्[28] ॥ ७ ॥

इन्द्रियं स्वकार्याच्छिक्तिरूपमेवानुमीयते न तु भौतिकन् ॥ ७ ॥

सा चाविरुद्धा विज्ञप्तेः

शक्तिस्तु[29] विज्ञाने वास्तु । अनिर्देश्ये[30] स्वरूपे वास्तु कार्योत्पत्तौ न विशेषः ।

एवं विषयरूपकम् ।

प्रवर्तेते ऽनादिकालात्शक्तिश्चान्योन्यहेतुके[31] ॥ ८ ॥

चक्षुराख्यां शक्तिमन्तः रूपञ्च[32] प्रतीत्य विज्ञानमर्थाविभासमालम्बनादविविक्त-[32-a]मुत्पद्यते । इदं द्वयमपि अनादिकालमन्योन्यहेतुकम् । कदाचित् शक्तिपरिपाकाद्विज्ञानं विषयाकारतया भवति । कदाचिच्च तदाकाराच्छक्तिः[33] । विज्ञानञ्च सा चोभयमन्यत्वेन अनन्यत्वेन च यथेष्टमुच्यताम्[34] । एवमन्तरालम्बनं धर्मताद्वयविशिष्टत्वात् विषयतयोपपद्यते ॥ ८ ।

इत्याचार्यदिङ्नागकृता

आलम्बनपरीक्षावृत्तिः

समाप्ता ।

---

# FOOT NOTES TO THE VṚTTI.

1. The expression परमाणून् वा......सङ्घातं वा .... is supported by Vinitadeva and Dharmapāla v. their tikas in this context.

The advocates of the atom-object perception are the old Sarvāstivādin and those of the aggregate-object perception the Sutra sect, ie. Sautrāntika (v. Kwei-Chi's comment below pp. ) A Digambara jaina, Sumati also pleads for the perceptibility of atoms, v. note 12 below p.

2.=*hdus.pa* v. Nyāyabindu Index. Or it may be also *Sañcaya*

3. This sentence is quoted in the Naya-cakra (Sri Jambu vijayaji's edition) p. 91. from Dignāga.

4.=de. lla.ma. yin. te=न तदाकारा :, तदाभा : ।

5. Supported by Vinitadeva. Paramartha and Hsuan Tsang interpret as: ज्ञानस्य तदकारत्वेऽ पि etc.

6. cp. Pramāṇavārtikālankāra, II. 302: कथं तर्हिआचार्येणोक्तम्

यदाभासा न सा तस्मात् चितालम्बं पञ्चकम्। (Pramāṇavārtika I,17)
न हि परमाणुभ्य उत्पद्यमानं तदाकारं चक्षुरादिज्ञानम्। अन्याकारस्यापि विज्ञानस्य कारणत्वेन आलम्बनत्वे चक्षुरादिपरमाणूनामपि आलम्बनप्रसङ्ग। तेहि तथा अन्यथ. वा भवन्तो द्विचन्द्रनीलाद्याभासविज्ञानहेतुरिति ।

7. एव is to be used after उत्पत्तिप्रत्यय according to Tib. This is a quotation from Āgama in Dharmapala's tikā and the Sastra in Vinitadeva's tikā.

8. Cfr. Naya-cakravṛtti, p 91 ( Muniji's edn. ) : अद्रव्यत्वात् परमार्थसत्वाभावात् कुत आभासविज्ञापनम् ।

9. बाह्यद्वय स्चापि

10.=*tshogs* is rendered as *Sanghāta* as it is previously spoken of. The word *tshogs* is generally for *kāya*, (v. Sālistambasūtra Index), *kalāpa* (Bodh. pañjikā, p. 473, n. 1. l. 4)

Sambhāra [ Dasabhūmika Sutra, Index] and *Samudāya* [Nyāyabindu Index].

11. This is the opinion of Neo-Sarvāsti-vādin according to Kwei-chi [v. his comments on Alambana. p.38]

12. cp. the opinion of Sumati, a Digambara cited in the Tallv. pañjikā p. 554:

सामान्यविशेषात्मत्वात् सर्वंपदार्थानां तुल्यातुल्यरूपेण द्विरूपा : परमाणव। तत्र समानं यद्रूपं तदिन्द्रियै गृह्यते नासमानम्। ततश्चैकाकारं विज्ञानमणुष्वविरूद्धमिति प्रत्यक्षसिद्धा : परमाणव : ।

13. This passage is rather difficult to put in Sanskrit. My reading is as literal as possible. *Khed. par. du. hgyur. bai= Viśeṣabhūta*. Khyed par-*viśeṣa, upādhi, atiśaya*, prakarṣa, etc. See Nyāyabindu Index. *Upādhi* see Bodhic. pañ. p. 363, n. 4 and p. 316, n. 1. *Karman* here seems to be a gramatical karman, object of cognition, see Dignaga's expression प्रतिकर्म विभज्यते cited in the Ślokavār. Comment of Umbeka. *Sūnya-vāda ver. 20.*

14 Tib. Zlum. po.

15. Or तस्मादद्रव्यसत्सु स : ।

16. Or परमाणुपरिहारे तदाभज्ञान हानित : ।

17. No plural particle in Tib.

18. = नीलादिवर्ण v. Hsuan Tsang's version.

19. More literally: अन्तविज्ञानमर्थाभासं तत उत्पन्नश्चेति धर्मद्वययुक्त मिति ( Or युक्त त्वात् ) अन्त : ...... See Abhisamaya. aloka (Gos) p. 382 ff. for a lengthy discussion on this point.

20 = अर्थात् cp.vṛtti ad 2a.

21. Or अस्त्वेवं भावत् तत्प्रतिभासतम्

22 This line is quoted by Bhatta Umbeka in his comment on Ślokavār. p. 271. Tib. reads literally: एकांशोऽपि अव्यभिचारित्वात् प्रत्यय : ।

23. Lit. अन्यस्मात् जातस्य......v. Vinitadeva's Tikā.

24. Gtan-tshigs. pa. dag. =Chinese [Hsuan Tsang] yin-ming [31-3; 74-4]. Vinitadeva takes them to be some Tārkika, rtog. ge. pa.

A Similar citation in the kosa bhasya, p. 84 in the context of pleading the *Saha-bhuhetu*:

इतस्तर्हि भावाभावयो स्तद्वत्वात् । एतद्धि हेतुहेतुमतोर्लक्षणमाचक्षते हैतुका: यस्य भावाभवयो : यस्य भावाभावौ नियमत : स हेतुरितरो हेतुमान् । ...... ....

Here Vasubandhu refers to the Haituka, perhaps an impartial logician who pleaded for the successive causation by law of concomitance; but Vasubandhu utilizes the definition of causation to his theory of simultaneous causation' cfr. Vinitadeva's Tikā on this passage. It is note-worthy that Dignaga cites the definition in a fuller form. Kumarila's criticism of the simultaneous causation theory of Buddhists is to be found in note 4 on p. 18.
The Haituka is an impartial logician, cfr. Kumarila: अलौकिकविवादाश्च वर्ज्यन्ते हैतुकैस्तत : । Anumana ver. 17. Haituka= Nyāya-vid-Parthasarathi's comment. Kumarila sometimes speaks of Dignaga as Nyāya-vid. v. Nirālambana-vāda ver. 118.

25. The passage: अथवा .. अविरोध is quoted in the Tattv. pañ p.582 which quotes the passage omitting the words क्रमेण वा in the ver. 7b.

26. Tib. རང་དང་མཐུན་པའི་

27. " རང་གི་གཟུགས་

28. " དབང་ *vaśa,* वश See Nyaya bindu Index.

My Madh. avatara. VI.62 with Bhasya.

29. " ཉམས་པ་ཉི་

30. " རང་གི་ངོ་བོ་ལ་

31. Cp. Kumarila's verse. अन्योन्यहेतुका चैव ज्ञानशक्त्योरनादिका । ŚlokavārSūnya ver. 19. Note this line quite agrees with Paramartha's reading.

32.=rań. gi gzugs རང་གི་གཟུགས་

32a. cp. संवेदनात् नीलं न भिन्नम् Slokavartika,p. 325 (Chaukhamba)

33. དེའི་རྣམ་པ་ར་ཉམས་པ་ To have the sense clear read the Chinese version here in this context. According to Vinitadeva तदाकारकचित्तात् शक्तिर्भवति ।

34. Better reading will be: अन्तर्विज्ञानम् cfr. vṛtti ad 6 c-d.